अस्य विवरणं तुलाशब्दे द्रष्टव्यम् ॥ (धर्म्मः । इति विष्णुनारदौ ॥ यथा,—

"अर्चयेत्तु घटं पूर्व्वं ततः शिष्टांश्च पूजयेत् ॥"

इति दिव्यतत्त्वधृतवचनम् ॥)

घटकः, पुं, (घटेन तुलया कायतीति। कै+कः।) चतुर्द्दशवक्रपरिमाणम्। द्विचत्वारिंशद्रक्तिका। इति लीलावती॥ नन्दिवृक्षः। तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"धवो घटो नन्दितरुः स्थिरो गौरो धुरन्धरः ॥"

घटपरीक्षा, स्त्री, (घटस्य तुलायाः परीक्षा।) तुलापरीक्षा। तत्र घटोत्पत्तिविधिर्यथा।

"पितामहः।

'छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम्।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥'

यूपवदिति यूपच्छेदनविहितसर्व्वेतिकर्त्तव्यतातिदेशः। सा च ॐ स्वधिते मैनं हिंसीरिति-च्छेदनमन्त्रविशेषादिरूपा इति व्यवहारप्रदीपः॥

'मन्त्रः सौम्यो वानस्पत्यच्छेदने जप्य एव च।
चतुरस्रा तुला कार्य्या दृढ़ा ऋज्वी तथैव च॥
कटकानि च देयानि त्रिषु स्थानेषु चार्थवत् ॥'

कटकानि वलयानि।

'चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ॥'

अत्र साधारणत्वेन शारदातिलकोक्तो हस्तो ग्राह्यः। यथा,—

'चतुर्विंशत्यङ्गुलाढ्यं हस्तं तन्त्रविदो विदुः।
यवानामष्टभिः कॢप्तं मानाङ्गुलमितीरितम् ॥'

यवानां तण्डुलीकृतानाम्।

'यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत्।
अदीर्घयोजितैर्हस्तश्चतुर्व्विंशतिरङ्गुलैः ॥'

इति कालिकापुराणात्॥

प्रमाणन्तु पार्श्वेन यवानाम्। 'षड्यवाः पार्श्वसम्मिताः।' इति कात्यायनवचनात् ॥ * ॥

अनयोर्थवस्थामाह कापिलपञ्चरात्रम्।

'अष्टभिस्तैर्भवेज्ज्येष्ठं मध्यमं सप्तभिर्यवैः।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम ! ॥'

कन्यसं कनिष्ठम्। पादौ स्तम्भौ। उपरि मृत्तिकोपरि। तत्समौ चतुर्हस्तावित्यर्थः। वस्तुतस्तु उपरितत्समौ उपरि तत्समं काष्ठान्तरं ययोः पादयोस्तौ ॥ * ॥ स्तम्भप्रमाणमाह व्यासः।

'हस्तद्वयं निखेयन्तु प्रोक्तं सुस्कयोर्द्वयोः।
षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः ॥'

सुस्कयोः स्तम्भयोः। षड्हस्तं निखातहस्तद्वयेन समं अर्थान्मृत्तिकोपरि हस्तचतुष्टयमित्यर्थः।

'अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव वा।'

तयोः स्तम्भयोः। हस्तावन्तरं हस्तद्वयपरिमितमध्यमित्यर्थः। अध्यर्द्धं सार्द्धहस्तद्वयम्। एतत्तु शालदन्त्रोद्भवा कार्य्या पञ्चहस्तायता तुला। इति विष्णूक्तपञ्चहस्तायततुलाविषयम्। व्यवहारदीपिकाप्येवम् ॥ * ॥

अथ घटारोपणविधिः। पितामहः।

'हस्तद्वयं निखेयन्तु पादयोरुभयोरपि।'

अत्र हस्तद्वयं मृत्तिकाभ्यन्तरे। हस्तचतुष्टयं मृत्तिकोपरि।' तथा,—

'तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि॥
घटाद्दशतरे स्यातां नित्यं दशभिरङ्गुलैः।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ॥
मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनौ।
प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटस्तथा॥'

नारदः।

'शिक्यद्वयं समासाद्य घटककर्टयोर्दृढम्।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥'

पितामहः।

'प्राङ्मुखान् कल्पयेत् दर्भान् शिक्ययोरुभयोरपि।
पश्चिमे तोलयेत् कर्त्तॄनन्यस्मिन् मृत्तिकां शुभाम्॥
पिटकं पूरयेत्तस्मिन् इष्टकाग्रावपांशुभिः॥'

अत्र मृत्तिकेष्टकाग्रावपांशूनां विकल्पः।

'परीक्षका नियोक्तव्यास्तुलामानविशारदाः।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च।
कार्य्यः परीक्षकैर्नित्यमवलम्बसमो घटः॥
उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः।
यस्मिन्न प्लवते तोयं स विज्ञेयः समो घटः॥
तोलयित्वा नरं पूर्व्वं पश्चात्तमवतार्य्य तु।
घटस्तु कारयेन्नित्यं पताकाध्वजशोभितम्॥
तत आवाहयेद्देवान् विधिनानेन मन्त्रवित्।
वादित्रतूर्य्यघोषैश्च गन्धमाल्यानुलेपनैः॥
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत्॥'

प्राड्विवाकसमाख्या तु पृच्छतीति प्राट् विविचयतीति विवाकः। इति व्यवहारमातृका ॥ * ॥

तथा च बृहस्पतिः।

'विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च।
प्रियपूर्व्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥'

वस्तुतस्तु प्राड्विवाकसमाख्यामाह कात्यायनः।

'व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्थितिः।
विवेचयति यस्तस्मिन् प्राड्विवाक इति स्मृतः॥'

अभिशस्तं पृच्छतीति प्राट् तदनुरूपं दिव्यं विविनक्ति इति विवाकः। प्राट् चासौ विवाकश्चेति कर्म्मधारयः ॥ * ॥

अस्य काम्यत्वेन नवग्रहपूजामाह मत्स्यपुराणम्।

'नवग्रहमखं कृत्वा ततः कर्म्म समारभेत्।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥'

ततश्च प्राड्विवाकः पूर्व्वं कार्य्यं पृच्छेत् निवेदितञ्च विवेचयेत्। ततोऽभियुक्तं तोलयित्वा अवतार्य्य धर्म्मावाहनादि कुर्य्यात्। पितामहः।

'एह्येहि भगवन् धर्म्म दिव्ये ह्यस्मिन् समाविश।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः॥
आवाह्य च घटे धर्म्मं पश्चादङ्गानि विन्यसेत् ॥'

अङ्गानि परिवारदेवताः।

'इन्द्रं पूर्व्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा।
वरुणं पश्चिमे भागे कुवेरं उत्तरे तथा॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत्॥*॥
इन्द्रः पीतो यमः श्यामो वरुणः स्फाटिकप्रभः।
कुवेरश्च सुवर्णाभो वह्निश्चापि सुवर्णभः॥
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते।
ईशानस्तु भवेत् शुक्ल अनन्तः शुक्ल एव च॥
ब्रह्मा चैव भवेद्रक्त एवं ध्यायेत् क्रमादिमान्॥
इन्द्रस्य दक्षिणे पार्श्वे वसूनावाहयेद्बुधः।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः॥
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः॥ * ॥
देवेशेशानयोर्मध्ये आदित्यानां तथायनम्।
धातार्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा॥
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः॥
इत्येते द्वादशादित्या मनुना परिकीर्त्तिताः॥'

अजघन्यो जघन्यजः। इति विष्णोर्विशेषणम्।*।

'अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः॥
अजैकपादहिर्व्रध्नः पिनाकी चापराजितः।
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः॥
स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः॥'

महायशाः विशाम्पतिर्भगवांश्चेति विशेषणानि॥

'प्रेतेशरक्षसोर्मध्ये मातृस्थानं प्रकल्पयेत्।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता॥'

गणसंयुतेति विशेषणम् ॥ * ॥

'निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते॥
श्वसनः स्पर्शनो वायुरनिलो मारुतस्तथा।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः॥
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः।
एतासां देवतानाञ्च स्वनाम्ना पूजनं विदुः॥'

विशेषमाह ब्रह्मपुराणम्।

'ओङ्कारादिसमायुक्तं नमस्कारान्तकीर्त्तितम्।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते॥
अनेनैव विधानेन गन्धपुष्पे निवेदयेत्।
एकैकस्य प्रकर्त्तव्यं यथोद्दिष्टं क्रमेण तु॥'

मन्त्र इत्यभिधानादनेनैवेत्येवकारश्रुतेश्च इदं द्रव्यं ओमसुकाय नमः इति योज्यं न तु धर्म्मायार्घ्यं प्रकल्पयामि नमः इति मिताक्षरोक्तम्। प्रमाणाभावादनन्वयाच्च। पितामहः।

'भूषावसानं धर्म्माय दत्त्वा चार्घ्यादिकं क्रमात्।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत्॥
गन्धादिकां नैवेद्यान्तां परिचर्य्यां प्रकल्पयेत्।'

एतत् सर्व्वं प्राड्विवाकः कुर्य्यात्। यथा,—

'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः।
श्रुतव्रतोपपन्नश्च शान्तचित्तो विमत्सरः॥
सत्यसन्धः शुचिर्दक्षः सर्व्वप्राणिहिते रतः।
उपोषितः शुद्धवासाः कृतदन्तादिधावनः॥
सर्व्वासां देवतानाञ्च पूजां कुर्य्याद्यथाविधि॥'

रक्तगन्धपुष्पादीनाह नारदः।

'रक्तैर्गन्धैश्च माल्यैश्च धूपदीपाक्षतादिभिः।
अर्चयेत्तु घटं पूर्व्वं ततः शिष्टांश्च पूजयेत्॥'

घटं धर्म्मम्। तथा च विष्णुनारदौ।

'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते।'

शिष्टानिन्द्रादीन्। अविशेषात् सर्व्वत्र रक्ता-